શ્રી.

श्री सामवेदीय नित्यकर्म.

વેદમૂર્તિ અમૃતરામ ગીરધરભાઈની સહાયથી.

પ્રસિદ્ધકર્તા.

श्री मोढ मित्रमंडळ.

कपडवणज.

અમદાવાદ

આર્યોદય પ્રેસમાં છાપ્યું.

શાકે ૧૮૧૮. સંવત ૧૯૫૩.

મૂલ્ય એક આનો.

॥ ॐ श्री ॥

પ્રસ્તાવના.

આ કાલે દિનપ્રતિદિન જનસમૂહની વૃત્તિ ધર્મ તરફ આકર્ષાતી પ્રતીત થાય છે તેનું કારણ ગમે તે હો પણ જો શ્રી પરમેશ્વર આ વૃત્તિ હિંદુઓમાં સદા જાગ્રત રાખે તો સર્વાંશે હિંદુસ્તાનનો અભ્યુદય થવા સંભવ છે. કારણ કે ધર્મ એ સર્વ શુભ ફલપ્રદાતા છે. ધર્મ એજ વ્યવહારિક અને પારમાર્થિક ઉન્નતિના આધાર રૂપ હોવાથી પોતાની જ્ઞાતિનો વ્યવહારિક અને પારમાર્થિક અભ્યુદય કરવાના આશયથી અસ્તિત્વમાં આવેલું આ મંડળ પોતાના નિશ્ચયરૂપ બીજના પ્રથમ અંકુર રૂપ આ પુસ્તકને પ્રસિદ્ધિમાં મુકવા દોરાય એ સ્વાભાવિક છે.

પ્રસ્તુત વિષય ઉપર આક્ષણ પૂર્વે ઘણાં પુસ્તકો રચાયાં છે, અને તેમાંનાં કેટલાંક વિના મૂલ્યે પણ પ્રાપ્ત થતાં હોવાથી આ પુસ્તકની આવશ્યકતા વિશે કોઇને સંશય પડે તો તે સંબંધમાં જણાવવાનું કે તેમાંનાં ઘણાંક પુસ્તકોના પ્રસિદ્ધકર્ત્તા યજુર્વેદી હોવાથી યજુર્વેદીય કેટલુંક કર્મ એ પુસ્તકોમાં આવી ગયેલું પ્રતીત થાય છે, અને એ પુસ્તકોમાં જેના પ્રસિદ્ધકર્ત્તા સામવેદી છે તે પુસ્તકો ઘણાં મૂલ્યવાળાં અથવા ટુંકાં છે, માટે આ સમયની પ્રજાને અનુકુળ પડતા સંપૂર્ણ કર્માદિને જણાવનાર આ પુસ્તકની આવશ્યકતા નિર્વિવાદ સિદ્ધ છે.

સામવેદી કર્મોનું અધ્યયન કરવા ઇચ્છનાર વિદ્યાર્થિઓને આ પુસ્તક વિના મૂલ્યે આપવા પ્રસિદ્ધ કરનાર મંડળનો વિચાર છે.

પ્રાણાયામનો વિધિ શ્રી ગુરૂદ્વારા જાણી લેવો વધારે યોગ્ય અને સુગમ હોવાથી આ પુસ્તકમાં દાખલ કર્યો નથી.

સંવત ૧૯૫૩ ચૈત્ર શુકલપક્ષ ૨. } શ્રી મોઢ મિત્રમંડળ—કપડવણજ.

જાહેર ખબર.

આ પુસ્તક હાલ નીચે લખેલે ઠેકાણેથી મળશે.

કપડવણજ—આમોદ મિત્રમંડળ સમાજ

ઠે. રા. રા. ત્રવાડી પીતાંબરદાસ લક્ષ્મીરામના મકાનમ

॥ ॐ श्री ॥

॥ श्री सद्गुरवे परमात्मने नमः ॥

अथ प्रातःसंध्या.

१. आचम्य प्राणानायम्य ।

ॐ भूः । ॐभुवः । ॐस्वः । ॐमहः । ॐजनः। ॐतपः । ॐसत्यं । ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात् । आपो ज्योति रसोमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

२. गायत्री मंत्रेण शिखा बंधनम् ।

३. भस्मधारणम् ।

* (ॐत्र्यंबक मिति वशिष्ठो ऽनुष्टुपूरुद्रः । भस्मना त्रिपुंड्रकरणे विनियोगः ॥

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टि वर्द्धनम् । उर्वा रुकामिव बंधनान्मृत्योर्मुक्षीयमामृतात् ॥

४. अथ संकल्पः । अत्राद्य महामांगल्य प्रद अमुक मासे अमुक पक्षे अमुक तिथौ अमुक वासरे ममो पात्त दुरित क्षयार्थं ब्रह्मवर्च सकामार्थं च प्रातःसंध्योपासन महं करिष्ये ॥

५. अथमार्जनम् । *ॐ कारस्य ब्रह्मा ऋषिः । देवी गायत्री छंदः । परमात्मा देवता । सर्व कर्मारंभे विनियोगः ॥

* व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजा गायत्र्युष्णिगनुपुबाग्नि वायु सूर्या गायत्र्या विश्वामित्रो गायत्री सविता । आपो हिष्टेतितिस्रणां सिंधुद्विपा गायत्र्यापः । मार्जने विनियोगः ॥

ॐ आपो हिष्ठा मयो भुवः । ॐ तानऊर्जेद धातनः । ॐ महेरणाय चक्षसे । ॐ योवः शिवतमोरसः । ॐ तस्य भाजय तेहनः । ॐ उशतीरिवमातरः । ॐ तस्मा अरंग मामवः । ॐ यस्यक्षयायाजिन्वथ । ॐ आपो जन यथा चनः ॥

६. अथध्यानम् । पूर्वासंध्यातु गायत्री रक्तांगीरक्त वाससा । अक्ष सूत्र धरा देवी कमंडलु समन्विता हंस स्कंध समारूढा तथा च ब्रह्मदैवता ॥ कुमारी ऋग्वेदमुखी ब्रह्मणा सह आवह । आयाहि वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥ गायत्री छंदसांमातर् ब्रह्मयोनि नमो स्तुते ॥

७. अथप्राणायामः । * भूरादीनां विश्वामित्रज

मदग्नि भरद्वाज गौतमात्रि वाशिष्ट कश्यपा । गायत्र्युष्णी गनुष्टु ब्बृहतीपंक्ति त्रिष्टु ब्जगत्यः । अग्नि वायु सूर्य बृहस्पति र्वरुणेन्द्रो विश्वेदेवा देवताः । गायत्र्या विश्वा मित्रो गायत्री सविता । आपो ज्योति रिति प्रजापति र्यजुः ब्रह्माग्निर्वायुः सूर्याः । प्राणायामे विनियोगः ॥

ॐ भूः। ॐ भुवः०॥

८. अथ आचमनम् । * सूर्यश्चेति नारायण प्रकृतिः सूर्यः । आचमने विनियोगः ॥

ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापेभ्यो रक्षंतां । यद्रात्र्या पापमकार्षं मनसा वाचाहस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुं पतु । यत् किंचिद्दुरितं मयि । इदमहं माममृतयोनौ सूर्येज्योतिषि जुहोमि स्वाहा ॥

९. अथ अघमर्षणम् ॥ * ऋतंच सत्यं चेत्यघमर्षणो ऽनुष्टुप् । भाव वृतः । अश्व मेघावभृथे विनियोगः ॥

ॐ ऋतं च सत्य चाभीद्धा त्तपसो ध्यजायत । ततो रात्र्यजायत । ततः समुद्रो अर्णवः समुद्रादर्णवाद धिसंवत्सरो अजायत । अहो रात्राणि । विदधद्विश्वस्य

मिषतो वशी सूर्या चंद्रमसौ धाता यथा पूर्वमकल्पयत दिवंच पृथिवीं चांतरिक्षमथो स्वः ॥

१० अथ अर्घ्य प्रदानम् । * ॐ कारस्य ब्रह्मा देवीगायत्री सूर्यः । अर्घ्यप्रदाने विनियोगः ॥

११. अथ सूर्यो परस्थानम् ॥ * उदुत्य मिति प्रस्कण्वो गायत्री सूर्यः । चित्रमिति कुत्स स्त्रिष्टुप् सूर्यः । उपस्थाने विनियोगः ॥

२ ३ २ ३१२ ३१२ ३२१ ३१
ॐ उदुत्यं जातवेदसं देवंवहन्ति केतवः। दृशे वि-
२६ ४ १ २ ३ २ ३ २ ३ १ २ ३१ २ ३ १ २ ३
श्वाय सूर्यं ॥१॥ ॐ चित्रं देवानामुदगादनीकं चक्षु मि-
२ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३
त्रस्य वरुणस्याग्नेः । आप्राद्यावा पृथिवी अंतरिक्षं सूर्य आ-
१ २२ ३ १ २
त्मा जगत स्तस्थुषश्च ॥२॥

१२. अथ गायत्रीजपः ॥ अद्यातिथौ० ॥ यथा संख्यया गायत्री जाप महं करिष्ये ॥

(जापं कृत्वा) अनेन मत्कृतेन यथा शक्ति गायत्री जाप्येन ब्रह्मात्मारविः प्रियताम् ॥

१३. अथ विसर्जनम् । उत्तरे शिखरे जाताभूम्यां पर्वत वासिनि । ब्रह्मणा समनु ज्ञाता गच्छ देवि यथा सुखम् ॥

अथ मध्याह्न संध्या.

प्रातः संध्या वत् सर्व कार्यं विशेषो तु

१. संकल्पे । मध्यान्ह संध्योपासन महं करिष्ये ॥

२. ध्याने चावाहने च । मध्यान्हेतु या संध्या श्वेतांगी श्वेतवाससा । वृषस्कंध समारूढा तथा च रुद्रदेवता । युवा यजुर्वेद मुखी रुद्रेणसह आवह । आयाहि वरदे देवि त्र्यक्षरे रुद्रवादिनि । सावित्री छंदसांमातर् रुद्रयोनि नमोस्तुते ॥

३. आचमने ॥ * आपः पुनंत्विति । वामदेवा नुष्टुवापः । आचमने वि० ॥

ॐ आपः पुनंतु पृथिवीम् । पृथ्विपूता पुनातुमां पुनंतु ब्रह्मण स्पति ब्रह्मपूता पुनातुमां । यदुच्छिष्ट मभोज्यं च यद्वा दुस्चरितं मम । सर्वं पुनंतु मामापो ऽसतांच प्रतिग्रहं स्वाहा ॥

४. अर्घ्यप्रदाने ॥ एकांजलि ॥

५. उपस्थाने ॥

६. गायत्री जापे । रुद्रात्मा रविः प्रियताम् ॥

७. विसर्जने ॥ रुद्रेणसमनुज्ञाता ॥

॥ अथ संक्षिप्त तर्पणम् ॥

१. अद्यातिथौ....—श्रीपरमेश्वर प्रीत्यर्थं देवऋषि मनुष्य पितृतर्पण महं करिष्ये ।

२, ॐ नमो ब्रह्मणे नमोब्राह्मणेभ्योनम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो नमो वायवेच मृत्यवेच विष्णवेच नमो वैश्रवणाय चोपजायच ॥

३, ॐ ब्रह्माणं तर्पयामि ॥ विष्णुं० ॥ रुद्रं० ॥ प्रजापतिं० ॥ वेदांस्तर्पयामि ॥ देवांस्त० ॥ छंदांसित० ॥ ऋषीस्त० ॥ पुराणाचार्यांस्त० ॥ गंधर्वांस्त० ॥ इतरांस्त० ॥ मासां०॥ संवत्सरं सावयवंत० ॥ देवींस्त०॥ अप्सरसस्त० ॥ देवानुगांस्त० ॥ नागां० ॥ सागरांस्त० ॥ पर्वतांस्त० ॥ सरितस्त० ॥ दिव्यान्मनुष्यांस्त० ॥ इतरान्मनुष्यांस्त० ॥ यक्षांस्त० ॥ रक्षांसित० ॥ सु[illegible]० ॥ पिशाचांस्त० ॥ पृथ्वींत० ॥ ओषधीस्त० ॥ पशुंस्त० ॥ वनस्पतिंस्त० ॥ भूतग्रामचतुर्विधंत० ॥

४. ॐ यमंत० ॥ यमपुरुषंत० ॥ कव्यवाडनलंत० ॥ सोमंत० ॥ अ[illegible]० ॥ अग्निष्वात्तांस्त० ॥ सोमपेभ्यांस्त० ॥ बर्हिषदस्त० ॥

५, अमुक गोत्रं अस्मत्पितरं अमुक शर्माणंत०॥

अमुक गोत्रांमातरं अमुकिदेविदांतर्पयामि ॥

६. ॐ सनकंत० ॥ २ ॥ सनंदनंत० ॥ २ ॥ सनातनं० ॥ २ ॥ कपिलं० ॥ २ ॥ आसुरीं० २ ॥ वोढुंत० ॥ २ ॥ पंचशिखंत० ॥ २ ॥

७. आब्रह्मस्तंबपर्यन्तंजगत्स्थावरजंगमम् । मयादत्तेनतोयेनतृप्तायान्तुपरांगतिम् ॥

८. ॐ येचास्माकंकुलेजाताअपुत्रागोत्रिणोमृताः । तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकम् ॥

॥ अथ ब्रह्मयज्ञः ॥

१. अद्यतिथौ—श्रीपरमेश्वरप्रीतयेयथाशक्त्याब्रह्मयज्ञमहंकरिष्ये ॥

२. ॐ भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ॥ ॐ तत्स वितुर्वरेणियोम् । भार्गोदेवस्य धीमाही २ । धियायोनःप्रचो १२१२ हुम् । आ २ । दायो । आ २४५ ॥ ओग्नायि । आयाहि २ वोयितो यारे यि । तो यारे यि । गृणानोह । व्यदातो यारे यि । तो यारे यि । नायिहो तासा २१ । त्सा

३ ५ २ र ३ ५ ४ ५ ४ २ ५ २
यि । वा २३४ औहोवा । हाँ २३४ पी ॥ अग्न आया-
४ १ ३ २ २ २ १ २
हिवी । तयायि । गृणानो हव्यदाता २३ यायि । निहो-
२ २ १ २ १ ३ ५ २ र
तासत्सि बर्हो २३ यिषि । बर्हो २ यिषा २३४ औहोवा ।
२ १ १११ ४ ५ ४ २ ५ २ ४ ४
बर्हो ३ पी २३४५ ॥ अग्न आयाहि । वा ५ यितयायि ।
१ ३ २ २ २ २ २ ३ ५ १
गृणानाहव्यदा १ ता ३ यं । निहोता २३४ सातसा २३
२ १ ५ ५
यिबा ३ । हा २३४ यिषो ६ हायि ॥

२. यथाशक्तिमत्कृतेनानेन ब्रह्मयज्ञेन ॐतत्मत्प-
रमेश्वरः प्रीयतां ॥

॥ अथ देव पूजा ॥

॥ आचम्य प्राणानायम्य ॥

१, ॐ विघ्नहर्त्रे महागणाधिपतये नमः ॥

तत्रादौभूतो त्सादनम्

२, *अग्नेरक्षा इत्यस्याग्निर्गायत्र्याग्नि रक्षोहा ।
भूतोत्सादनेवि० ॥

५र २ ४ २ ५ ४ ५ १ २ २ १
अग्ने रा ३ क्षाणो ऽ हसा: । प्रतिस्मदे व रषा
२ १ २ १ २ २
२३ ता । तपायिष्ठा २३ यिरा । जरादा २३ हा २४३ ।

ओ २३४५ इ । हा ॥१॥

३, भूशुद्धिम् । * भूमिभूमि रिति साम्नाः । इन्द्रऋषिः । यजुश्छंदः । भूम्यादयो देवता । भूम्याभिमंत्रणाविः० ॥

ॐ भूमिः ।३। अंतरिक्षं ।३। द्यौः ।२। द्या २३४। औ होवा । ए ३। भूताया २३११११ ॥१॥

४. तता कलशाराधानम् ॥ * यदाकदेतिसफो बृहति वरुणावाहने वि० ॥

यदा कदा चमींदुषेस्तो ताजरे तमर्त्यः ॥ आदिद्देतवरुणं विपा गिराधर्त्तारं विव्रतानाम् ॥

५ अथ वरुण पूजनम् । यद द्यका ५ च हृत्रहान् । उदगा आभसूरा २३ या । सा वा २ मू । तादिं द्रताये ३ । हुं । वा ३४ शा ६ हा यि ॥

६. पवित्र करणम् । ॐ भू भूवः स्वः । तत्सवितुवरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ॥१॥

ॐ तत्सवितुर्वरेणियोम् । भार्गोदेवस्य धीमाही २ । धि-

१२ ३ २ १ १ - १ २ १ १ १
यो योनः प्रचो १२१२। हुम्। आर। दायो। आ २४५
॥२॥

४३५ ४३५३ ४ ५ ४ २ १ ३ २३
ॐ सोम ङ् राजानं वरुणाम्। अग्निं मन्वार भा-
१ २ २ २३ १ २ १३२ १ २
महे ३। होवा ३ हायि। आदित्यं विष्णुङ् सूर्य। होवा ३
२ २ १२ २ १ २ २ १९
हायि ब्रह्माण। २३ ञ्चा ३। होवा ३ हायि। बृहा ३ ऊ-
२ ३ ५
वा ३। पा २३४ तीम् ॥३॥

७ अद्यातिथौ० ममदुरित क्षय पूर्वक श्री परमेश्वर प्रीतये अत्र वसन्निहितानां शिवादि देवानां यथाशक्त्युपचारै रेकतं त्रेणाहं पूजयिष्ये ॥

८, * आवो राजेति वामदेव स्त्रिष्टु ब्रुद्रः। उदुत्यमिति प्रस्कण्वो गायत्री सूर्याः। आतूनेति गोरिवित गायत्री गणपतिः। इमङ् स्तो ममिति कुत्सो जगती दुर्गा। इदं विष्णुरिति मेधा तिथि र्गायत्री विष्णुः सर्वेषांन्यास पूर्वक पूजने विनियोगः॥

४३५३ ३ ४ ३२ ३ २ ३ ४१५ १२ ३
ॐ आवोराजा। नमध्व। रस्यरुद्राम्। होता
१ २ २३ ४ ५ २ १ २
राम्। स। त्ययजा ३ म्। रोदसीयोः। अग्निंपु। रा। तन
३ २^३ ४ ५ १ २ १ २ १ २
यि। त्नोरचित्तात्। हिरण्य। रू। पा ३ मव। सा ३४२

२ ४
यि । का ३ र्णू ५ इवा ६५६ मू ॥१॥
४५ ४ १ ७ ^ ३
ॐ उदुत्यं । ओहायि । जा । तवे २ दा २३४
५ २र१ १ २^३ ५ १ र ५
साम् । देवंवहा । तींकता २३४ वाः । दा २३४ औहायि ।
१ २र १र १ ४ ५ ४
वायिश्वायसू । र्याम् । औ २३ होवा । हो ५ इ । डा ॥१॥
५र र २१ २ १ २र
ॐ आतून आ । द्रक्षूमा २३ न्ताम् । चायित्रंग्रा-
१ २ १ १ १२र ३ ५
भा २३ ञ् हायि । संग्रे २ भाया । महा हस्तो २३४ हा-
१ १ १ १ ^ ३
यि । दक्षा २ यिणायिना । महा २३ । हा २ स्ता २३४
५र र १ २ १ ११११ १
औहोवा । दक्षिणे ३ ना २३१११ ॥१॥
३२ ३ ५ २ ^३ ५
ॐ इमङ् स्तो २३४ मामू । अर्हाते २३४ जा ।
१२र१ २ १ ३२^३ ५ ३ २^३ ५
तान्रदसे ३ । होयि । रथामी २३४ वामम्माहे २३४ मा ।
१२र१ २ १ ३ २^३ ५ २ ^ ३
मानीषया ३ । होयि । भद्राही २३४ नाः । प्रमाती २३४
५ १ २ १२ १ ३२^ ३ ५
रा । स्यासङ् सदे ३ । होयि । अग्नायिसा २३४ ख्या-
३२^ ३ ५ १२१ २
यि । मारायिषा २३४ मा । वायंतवा ३ । हो २३४५ इ ।
डा ॥२॥
५ ५ १ ^ ३ २ ३ ५
ॐ इन्द्रा ६ मे । विष्णू २ः । विचक्रा २३४ मा-

१ ५ २ १ २ - १ - २
यि । आयिर्धानि । दधायिपा १ दा२मू । ममू २ हो १ ।
१ २ १ ३ ५२ २ २ २
हा २३ मा ३ । स्या २ पा २३४ औं होवा । ए ३ । सु-
ले १ ॥१॥

१, ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नोरुद्र प्रचोदयात् । इति रुद्रगायत्र्या स्वदेहे न्यासं कुर्यात् । देवेच ॥

१०, अथ पंचामृत स्नानम् ॥ ※चक्रं यदस्येति अथर्वा विराडिन्द्रः । पयस्नानेवि० ॥

५ ४ ५ २ ४ २ ५ ४ २ १ २ २
ॐ चक्रं यदस्या प्स्वानिषत्ताम् । उतोतदस्मै म-
२ १ २ १२ २ १ २
ध्विच्चच्छा २३ द्यात् । पृथिव्या मतिपितं यदू २३ धाः ।
१२ २ १ २२१२ २२ १ २
पयोगो २३ षु । आदधा ओषधिषु । इडा २३ । भा २४३
१
ओ २३४५ इ । डा ॥१॥

महारुद्राय सांगाय सपरिवाराय पयस्नानं समर्पयामि ॥ वरुण स्नानम् ॥

※दधि क्राव्णारिति अनुष्टुब्दधिः । दधिस्नाने वि० ॥

४ ५ ४२ ५२ २ ४
ॐ ओहायि । दधि क्राव्णा अकारिषं । ओहायि ।
१ २ २ १ २ १ २
ओहायि । जिष्णो रश्वस्य वाजिना २३ हायि । सुरभिनो

२ १२ २ १ १ ५ १
मुखाका २३ रात् । मना २३ होयि । आयु २३ हा ।
२ १२ २ १
पिनारा २३ यिपा ३४३ त् । ओ २३४५ इ । डा ॥१॥

* घृतवेति वरुणो जगति द्यावा पृथिवी घृत स्नाने वि० ॥

४ ३ ५ ४ २^३ ४५५ ५
ॐ घृतव । ता ३ यि । भुवनानाम् । अभिश्रिया ।
२ १२ ५ २ २ १ ५ २
उर्वी पृथ्वी मधुदुघेसु पेपमा २३ होयि । द्यावा पृथि-
२ २५ १ १ २ १ २
वी वरुणा । स्या धर्मणा २३ हायि । विष्काभा २३ यिते ।
१ २५१२ १ २ २ २ १ २ १
आजरेभूार । राये ३ । तमा उवा ३ । ए ३ । इन्दुःसमुद्र मु-
२ १२ २५ ३ १ १ १ १ १
र्विया विभार्ती २३११११ ॥१॥

* सपूर्व्योमिति प्रजापति रनुष्टुबिन्द्राः मधु स्नाने वि० ।

५ ५ ५ ५ ५ २५ १ ५
ॐसपूर्व्यो महोना ६ मे । वेनःक्रतु ३ भाइ रानजे ३ ।
२ २ ६ २ २ १ ५ ६
हा ३ हा । औ ३ हो ३ वा । आयिही २ । यस्य द्वारा
१ २ २ २ ६ २ २ १
३ मानुःपिता ३ । हा ३ हा । औ ३ हो ३ वा । आ
१ ५ २ २ २ ६ २ २
यिही २ । दायिवेषुधा ३ । हा ३ हायि । औ ३ हो ३ वा ।

१ १ १ ३ ५२ २ २
आयिही २ । बआ २३ । ना २ जा २३४ औहोवा । म-
१ ३ १११११ १
धुश्चुता २३१११ ॥१॥

* रसन्ते तीषो वृषीयो गायत्री सोमः शर्करा-
स्नाने वि०

२ २ २ १ २ १ — २
ॐ रसंते माइ । त्रो अर्यमा । पिबन्तुवा २ । ऋणः
१ २ १ —२ १ ३ ५२ २ २
कवायि । षत्रमाना २ स्यम । ऋ२ता २३४ औ होवा । इ-
१२ २
षो वृधे १ ॥१॥

११ * आपो वृतस्येति आपास्त्रिष्टु ब्जापः शु-
द्धोदक स्नाने विनियोगः ।

२२ १२ २ १ २ २ १
ॐ हाउ ।३। एरयत् ।३। अपः समेरयत् । ३ । भूत
२ २ २ २ २ २२ २ २
मेरयत् । ३ । अपाङ्गर्भोग्निरिडा । पाङ्गर्भोग्नि रिडा । २ ।
२ २ २ २ १ २ २ १
पृथिव्या गर्भोग्निरिडा । ३ । समन्यायं त्युपयन्तिया २३
२ २ १ २ २ १ २ १२
न्याः । समान मूर्वे नद्य स्पृणा २३ न्ती । तमुङ् शुचिङ्
२ २ २ १ २ १२ २ २ १
शुचयोर्वा दिवा २३ ङ् साम् । अपान्न पातमुप यान्ति या
२ २२ १२ २ १ २ २ २ १
२३ पाः । २३ हाउ ।३। एरयत् । ३ । अपः समेरयत् । ३ । भूत
२ २ २ २ २ २ २ २
मेरयत् । ३ । अपाङ्गर्भोग्नि रिडा । पाङ्गर्भोग्नि रिडा । २ ।

२ ३ ३ २ २ १ २
पृथिव्या गर्भोग्निरिडा ३।३। हाउवाए। अग्निः शिशु-
१ २३ १ २ १ २३ १३ २ १ २ १ २३ १२
कः।ए। शुक्रः शिशुकः।ए। तेजः शक्रस्यशकं।ए। ते-
२ १२ ३ २३ ३ १३ २ १ २३ १ २२१ २३ १ ३
जः सः प्रासमींचीः।ए। तेजउषा नजारः।ए।सुवर्ज्यो-
३ १ १ १ १ १
तीं २३१११ ॥१॥

१२ ततोऽभिषेकः ॥

१३ * अर्चन्तीति प्रियमेधानुष्टुबिन्द्रः गंधदाने
।वि० ॥

२ २ ^ ३ ५ २ ३ ४
ॐ अर्चतप्रार्चताना २३४ राः। प्रियमेधा ३ सो
२ ३ ५ २ १ ४ २३ ३ ५ १
३ अर्चत। अर्चतुपू २३ त्रा ३ काउत। पुरमिद्धा २३।
३ २ ४
ऽनुवा ३ र्चा ५ ता ६५६ ॥१॥

* अक्षन्नोतियमः पथ्या पंक्तिरिन्द्रः। अक्ष
दाने वि० ॥

३ ४ ३ ४३ ५ ३ २ १ ४ ५ ४३
ॐ अक्षन्नमींमद। तहीं ३।आर ३४। वाँमिया
५ ३ ४ ५ १ २३ १ २३ २ १३ २ १
अधू। षत। अस्तोषत स्वभानव ः। विप्राना २३ वी।ष्ठा-
२ २ ३ १३ २ २ १ ^ ३ ५३ ३
यामती। योजानू ३ वा ३ यि। दूरता २३४ औहोवा।
३ ५
हा २३४ री ॥१॥

* पवित्रन्तेत्यादीत्यो जगती ब्रह्मणस्पतिः ।
पुष्पदाने विनियोगः ॥

२ १ २ ३ १ २ १ २ १
ॐ पवित्रन्त विततं ब्रह्मणस्पते ३। हुवे २३ ।२।
१ २ २ २ १ ३ २ ३ १ २ ३ १
होवा ३ हा ३ । हायि। प्रभुर्गात्राणि पर्येषि विश्वता २३।
१ १ २ २ २ १ २ ३ १ ९ ५
हुवे २३।२। होवा ३ हा ३। हायि। अतप्ततनूर्नतदा २ मो
२ १ १ २ २ २ २ १ ५ २ १
अश्नुते ३। हुवे २३ ।२। होवा ३ हा ३। हायि। श्रृतासयि
२ १ ९ ५ १ १ २ २ २
द्वहंतः सन्तदा २ शत। हुवे २३।२। होवा ३ हा ३। हा
५ ३ ३ २ १ ५ ३ ३ ९ ३ १ ५ ९ २ ३
३४। औहोवा । अर्कोदिवाना २ स्परमावियो २ मा
१ १ १ १ १
२३१११ ॥१॥

* त्वेषास्ते तिग्मो नुष्टुबाग्निः । धूपदानेवि० ॥

२ ३ १ ४ ३ ५ २
ॐ त्वेषास्ते २३ धूमऋण्वति हाउ । दिविसंछुक्र ३
१ २ ४ ३ ३ ५ २ १ २ ४
आताता २३ः। सूरो नही हाउ । द्युता तुवा ३ म। कृ-
३ ५ २ १ ३ २ १
पापवा हाउ ।करोचा २३ सा ३४३ यि । ओ २३४५
इ। हा ॥१॥

* आयु अश्नुरिति वरुणा गौतमौ त्रिष्टुबरु-
णादित्यौ दीपदर्शने विनियोगः ।

२र १र र २र १ २ १ २
ॐ हाउ ।३। आयुश्चक्षुर्ज्योतिः । औ होवा । ईया ।
४ १र
उदुत्तमं वरुण पाशमा २१ स्मात् । अवाधमं विमध्य मश्र-
२ १ २ १र र २ १ २ र
श्रथा २३ या । आदित्य व्रत वयंता २३ वा । अना-
१ र र २ १ २ २र १र
गसो अदित त्वसया २३ मा ३ । हाउ । ३ । आयुश्चक्षु-
र १२ १ ^ ३ ५र र ३
र्ज्योतिः । औ होवा । ई २ । या २३४ औ होवा । ई
११११११
२३१० ॥१॥

* अहमस्मीति दिशो नुष्टुब्विश्वेदेवा: । नैवेद्य-
निवेदने विनियोगः ॥

२र २१ २१ २र १र १र १र
ॐ हाउ । ३ । अहमस्मं । ३ । अहमस्मादो । हमस्मादो ।
२र १र २र १ २र १ २र
२ । हंविधारयो । २ । हंविधारय : । हाउ । ३ । यद्वर्चो
१ २ १ २र १ २र १ र २ १ २ १ २ र
हिरण्य । स्या । यद्वा वर्चो गवामु । ता । सतस्य ब्रह्मणो-
१ र २र १ २ १ १ २र
व । चा : । तेनमासक्ष सृजाम । सायि । हाउ । ३ । अ-
१ २ १ २र १र २र १र २र १र
हमस्मं । ३ । अहमस्मादो । हमस्मादो । २ । हंविधारयो
२र १ २ १ १ २र १ २
। २ । हंविधारयः । हाउ हाऊ हाउवा । ए । अहमस्म म-
१ २र १र २र १ २र १ २ १ २र १र २र १
हमस्मादो हंविधारयः । ए । अहमस्म महमस्मादो हंविधारयः

२६ १ २ १ २२१ ६ २६ १ २६ १ ६
। ए । अहमन्न महमन्नादा इविधारयः । ए । अहङ् सुवज्यों-
३ १११११
ता २३११११ ॥१॥

* फलेति कश्यप स्त्रिष्टु न्निन्द्रः । फलदानेवि० ॥
२६ १ २
ॐ हाउ । ३ । फाल्फल्फल्फल्फल्फल् । ३ । हा-
१ ६ ३ २ —१ २ २ २
उ । ३ । इन्द्रन्नरो नेमधिताह वा२न्तााये । यपाया युनजते
— १ २ २ ६ २ — २ ६
धिया २ स्ता ३ । शूरो नृपाता श्रवसश्चका २ मा। आगा-
६ २ — १ २६ १ २
मति व्रजे भजा तुवा२न्नाः । हाउ । ३ । फाल्फल्फल्फ
२१ १ ११११ १
ल्फल्फल् । ३ । हाउ । ३ । वावामनः सुवारिहा २३११११ ॥ ॥

* चन्द्र मेति त्रितः वासुपर्णः पथ्यापंक्ति रिन्द्रः ।
दक्षिणा समर्पणे वि० ॥

२ १ ६ २ २ १ २ २ १ ६
ॐ चंद्रमा आउवा । प्सुवां तारा उवा । सुपर्णो
२ २ १ ६ २ १ ६ २ २ १ २
धाउवा । वतेदिवि । नवोहिरा उवा । ण्यनायि माया उ-
२ १ २ २ १ १ २
वा । पदं विंदा उवा । ति विद्युताः । विश्तंमा आउवा ।
२ १ ६ २ १
स्यरोदा २३ सा ३४३ यि । ओ २३४५ इ । डा ॥१॥

* उर्ध्वलोके तीन्द्रो नुष्टुप् सूर्यः । आरात्रिका
वलोकने वि० ॥

२ १ ३ २ २३ १ २ १ ३ ३ २ २३
ॐ उच्चं लोकानरोचयः । होयि । इमांलोकानरो-
१ २ १ २ २ २३ १ २ १ २ २ १ १ २
चयः । होयि । प्रजाभूतमरोचयः । होयि । विश्वंभूतमरो-
१ ^ ३ ५ ५ ५ १ २ ५ ३ १ १ १ १ १
चयः । हो २ । हा २३४ औहोवा । घर्म्मोज्योती २३१११
॥१॥

हरिः ॐ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ॥ तेहनाकं महिमानःसचन्तयत्र पूर्व्वे साध्याःसन्तिदेवाः ॥ ॐ राजाधिराजाय प्रसह्य साहिने । नमोवयं वैश्रवणाय कुर्महे । समेकामान्कामकामायमह्यं । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजायनमः ॥ ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यंराज्यं माहाराज्य माधिपत्यमयंसमन्तपर्यायीस्यात्सार्व्वभौमः सार्व्वायुष आन्तादापरार्धात् ॥ पृथिव्यै समुद्रपर्यन्ताया एकराडिति । तदप्येष श्लोकोऽभिगीतोमरुतः परिवेष्टारो-मरुत्तस्या वसन्गृहे । आविक्षितस्य काममेर्व्विश्वेदेवाःसभासदइति ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखो विश्वतो बाहुरुतविश्वतस्पात् सम्बाहुभ्यांधमतिसम्पत्त्रैर्द्यावाभूमीजनयंदेव एकः ॥ ॐ ईशानःसर्व्वविद्यानामीश्वरः सर्वभूतानां । ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमे अस्तुसदाशिवोम् ।

ॐनमःशिवाय श्रीसांब० मंत्रपुष्पंसम० ॥

१४ अत्राद्य० ममोपात्त दुरित क्षय पूर्वक मिलितो च्चार द्रव्यै पूजन कृतेन श्री महारूद्र प्रियतां.

अथ वैश्वदेवः ॥

१, आचम्य प्राणानायम्य ॥ पाकं संप्रोक्ष्यस्थंडिले पंचभूसंस्कारान् कुर्यात् । (१) दर्भैः परिसमुह्य । ३ । (२) गोमयेन उपलिप्य । ३ । (३) कुशमुलेन उल्लिख्य । ५ । (४) अनामिकां गुष्ठेन उध्दृत्य । ५ । (५) उदकेनाभ्युक्ष्य ॥

२. ॐ भूर्भुवः स्वः । पावक नामानमग्निं प्रतिष्ठापयामि ॥ अग्निपूजनम् ॥

३. अद्यतिथौ० ममपंचसूना दोष परिहारार्थं आत्मसंस्कारार्थं च नित्यविधिरूपं वैश्वदैवाख्यं कर्माहं करिष्ये ॥

४. * इदं भूमेरिति परमेष्ठी प्रजापत्यनुष्टु बग्निः न्यंच करणे विनियोगः ।

ॐ इदं भूमेर्भजामह । इदं भद्रं सुमंगलं । परास्पत्नान्बाधस्वान्येषांविंदतेधनं ।

५. * अदिते ऽनुमते सरस्वत्येति प्रजापति रेकप दा गायत्र्य दितिरनुमाति सरस्वत्यो देवताः। अंजलि प्रसे-चने वि० ॥ (१) ॐ अदिते नुमन्यस्व । (२) ॐ अनुमत नुमन्यस्व । (३) ॐ सरस्वत्य नुमन्यस्व ॥

६. * देवसावित रिति प्रजापाति स्त्रिष्टुप् सविता पर्युक्षणे वि० ॥

ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गंधर्वः केतपूः केतंनः पुनातु वाचस्पति वाचनः स्वदतु ॥

७ ततः समिधं हुत्वा आहुतयः ॥

ॐभूः स्वाहा । इदमग्नये नमम॥ ॐ भुवः स्वाहाः। इदं वायवे नमम ॥ ॐ स्वः स्वाहा । इदं सूर्याय नमम ॥ ॐ भूर्भुवः स्वः स्वाहा । इदं प्रजापतयेनमम॥ ॐ देवकृतस्यै न सो वय जनमसि स्वाहा । इदं देवेभ्यो नमम॥ ॐ पितृ-कृतस्यै न० । इदंपितृभ्यो नमम ॥ ॐ मनुष्यकृतस्यै न० । इदंमनुष्येभ्योनमम ॥ ॐ अस्मत् कृतस्यैन० । इद मस्मद्भ्यो नमम ॥ ॐ यद्दिवा चनक्तं चैनश्च-कृत मस्यावय० । इदं दिवानक्ताभ्यां नमम ॥ ॐ यत्स्वपंत श्चजाग्रत स्चैनस्चकृतमस्यावय० । इदं स्वपं जाग्र भ्यांनमम ॥ॐ यद्विद्वांसश्चा विद्वांसश्चैनश्च कृतमस्यावय० ।

इद मग्नये नमम० ॥ ॐ एनस एनसो वयजन० । इदमग्न येनमम ॥ ॐ अग्नयेस्वाहा । इदमग्नयेनमम । ॐ धन्वंतरये स्वाहा । इदं धन्वंतरये नमम ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यो नमम ॥ ॐ प्रजापतये स्वाहा । इदं प्रजापतये नमम ॥ ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृतये नमम ॥

८. पुनः समिधंहुत्वा

* देव सवित रिति पर्युक्षणं ॥

(१) ॐ अदिते न्नमंस्थाः।२। ॐ अनुमते न्नमंस्था ः। (३) ॐ सरस्वत्यन्वमंस्थाः॥ प्रदक्षिणा॥

९. बलिदानम् । उदक धारा ।४।

धारा १

(१) ॐ पृथिव्ये नमः। इदं पृथिव्यै नमम ॥
(२) ॐ वायवे नमः। इदं वायवे नमम ॥
(३) ॐ विश्वेभ्यो देवेभ्यो नमः । इदं विश्वेभ्यो देवेभ्यो नमम ॥
(४) ॐ प्रजापतयेनमः। इदंप्रजापतये नमम ।
(उपरि उदक धारा)

धारा २

(१) ॐ अद्भ्यो नमः। इदमद्भ्यो नमम ॥
(२) ॐ ओषधि बनस्पतिभ्यो नमः। इदमोषधि बनस्पतिभ्यो नमम ॥
(३) ॐ आकाशायनमः। इदमाकाशायनमम ॥
(४) ॐ कामायनमः। इद कामाय नमम (उपरि उदक धारा)

धारा ३

(१) ॐ मन्यवे नमः। इदं मन्यवे नमम ॥
(२) ॐ इन्द्रायनमः। इद मिन्द्राय नमम ॥
(३) ॐ वासुकये नमः। इदं वासुकये नमम ॥
(४) ॐ ब्रह्मगेनमः। इदं ब्रह्मणे नमम ॥ (उपरि-उदक धारा)

धारा ४

ॐ रक्षो जनेभ्योनमः। इदं रक्षो जनेभ्यो नमम ॥ (उपरि उदक धारा)

(अ) अपसव्यं ॥ अमुक गोत्र अस्मत् समस्त पितृभ्यःस्वधा। इदं पितृभ्यो नमम ॥ (उपरि उदक धारा)

(ब) सनकादि मनुष्येभ्योहंतः। इदंसनकादि०॥ (उपरि उदक धारा)

(क) नंदादि मोभ्यो नमः। इदं नंदादि०॥ (उपरि उदक धारा)

१० स्तुतिपाठः । आरोग्य मायुरैश्वर्यं धीर्धृतिः शबलं यशः । ओजोवर्चः पशून्वीर्यं ब्रह्म ब्राह्मण्य मेवच सौभाग्यं कर्म सिद्धिं च कुल जैष्ठ्यं सुकर्तृताम् । सर्वं मे-तत्सर्वं साक्षीन्द्रविणोदरि रीहिणः ॥

* कयान श्चित्रेति वामदेव गायत्री विश्वेदेवाशा-न्त्यर्थे जपेवि० ॥

ॐ का ५ या । नश्चा ३ यित्रा ३ आभुवात् । ऊ । ती । सदावृधः स । खा । औ ३ हो हायि । कया २३ शचायि । ष्ठयौहो ३ । हुम्मा २ । वाऽ२ र्त्तो ३५ हायि ॥१॥ का ५ स्त्वा सत्यो ३ मा ३ दानाम् । मा । हिष्ठोमात्सादंध । सा । औ ३ हो हायि । दृढा २३ चिदा । रुजौहो ३ । हुम्मा २ । वाऽ२ सो ३५ हायि ॥२॥ आ ५ भी । षुणा ३ः सा ३ खिनाम् । आ । विताजर१ यितॄ २ । णाम् । औ ३ हो हायि । शता २३ भवा । सियौहो ३ । हुम्मा २ । ताऽ२ यो ३५ हायि ॥३॥

ॐ स्वस्ति न इन्द्रो वृद्धः श्रवाः स्वस्तिनः पूषा वि श्ववेदाः । स्वस्ति न स्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्प-

ति दधातु ॥

ॐ स्वस्ति । ३ । शान्तिः ॥ ३ ॥ चतुर्भिश्च ॥ २ ॥ द्वाभ्यां पंचभिरेवच । हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ।

अद्यतिथौ० अनेनवैश्वदेवाख्येन श्री परमेश्वरः प्रीयताम् ॥

११. अथ गोग्रासादि

(अ) सुरभी वैष्णवी माता नित्यं विष्णु पदे स्थिता । गोग्रासन्तु मयादत्तं सुरभी प्रतिगृह्यताम । इदं गोभ्यो नमम ॥

(ब) पिपीलिका कीटपतंग संघाबुभुक्षिताः कर्म निबद्धबद्धाः । प्रयांतुते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवंतु। इदं पिपीलिकादिभ्यो नमम ॥

(क) ऐन्द्र वारुण वायव्या याम्या वैनैरुतस्तथा । वायसाः प्रतिगृह्णंतु भूमौ पिंडमयार्पितं । इदं वायसेभ्यो नमम ॥

(ड) द्वौश्वानौ श्याम शवलौ वैवस्वद कुलोद्भवौ । ताभ्यां बलिं प्रदास्यामिस्यातांम तावहिंसकौ । इदं श्वभ्यां नमम

ततो हस्तो पादौ प्रक्षाल्य आचमनम् ॥

अथ भोजन विधि

१. ॐ सत्यं त्वर्तेन परिषिंचामि ।

२. उदक धारा ॥ ॐ भूपतये नमः ॥ ॐ भुव नपतये नमः ॥ ॐ भूतानांपतये नमः ॥

३. ॐ अमृतोपस्तरणमसिस्वाहा ॥

४. (१) ॐ प्राणायस्वाहा । (२) ॐ व्यानाय स्वाहा । (३) ॐ अपानायस्वाहा ॥ (४) ॐ समानायस्वा- हा । (५) ॐ उदानाय स्वाहा ॥

५. रौरवे पुण्य निलये पद्मा बुधनियोगिनां उच्छिष्ट भागधेयानाम क्षय्यमुपतिष्ठतु ॥

६. ॐ अमृतो पिधान मसिस्वाहा ॥

अथ सायं संध्या ॥

प्रात संध्यावत्सर्वं कार्यं विशेषोतु—

१. संकल्पे । सायं संध्योपासन महंकरिष्ये ।

२. ध्याने । अपरान्हेतु यासंध्या कृष्णांगी कृष्ण वासमा । गरुडस्कंध समारूढा तथा च विष्णुदेवता ॥ वृद्धा सामवेद मुखी विष्णुना सहआवह । आयाहिवर दे-

देवि त्र्यक्षरे विष्णु वादिनि ॥ सरस्वति छंदसांमातर् विष्णुर्योनि नमोस्तुते ॥

३. आचमने। * अग्निश्चेति नारायण प्रकृत्याग्निः। आचमने वि० ॥

ॐ अग्निश्च मामन्यु श्चमन्यु पतयश्चमन्यु कृतेभ्यः पापेभ्यो रक्षंतां यदन्हा पापमकार्ष मनसावाचा हस्ता भ्यांपद्भ्या मुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दु- रितमयि। इद महं माममृतयो नौ सत्ये ज्योतिषि जुहो मिस्वाहा ॥

४. अर्घ्य प्रदाने। उपस्थाने च ॥

५. गायत्री जापे। विष्णुर्वात्मा रविः प्रियताम् ॥

६. विसर्जने। विष्णुनामसनुज्ञाना ॥

आरति.

जय गंगाधर हर हर, जय गिरिजाधीशा, शिव जय गि- रिजाधीशा त्वं मां पालय नित्यं, कृपया जगदीशा. हर हर हर महादेव ॥ १ ॥

कैलासे गिरिशिखरे, कल्पद्रुमविपिने, शिव०
गुंजति मधुरकरपुंजे, कुंजवने गहने; शिव०

कोकिल कूजित खेलत, हंसावनललिता, शिव०
रचयति कलां कलापी, नृत्यति मुदसहिता हर हर० ॥२॥
तस्मिन्मुललितदेशे, शालामणिरचिता, शिव०
तन्मध्ये हरनिकटे, गौरी मुदसहिता; शिव०
क्रीडां रचयति भूषां रंजितमतिमीशं, शिव०
इंद्रादिकसुरसेवित, प्रणमति ते शीर्षम्. हर हर० ॥ ३ ॥
विबुधवधूर्बहु नृत्यति, हृदये मुदसहिता; शिव०
किन्नरगानं कुरुते, सप्त स्वरसहिता. शिव०
धिननं धिननं कथयति, मृदंग वादयते, शिव०
कुनु कुनु ललितं वेणु, मधुरं नादयते हर हर० ॥ ४ ॥
रुणु रुणु चरणे वादति, नुपुरपु ज्वलिता. शिव०
चक्रावर्ते भ्रमयति, कुरुते तां तां तां; शिव०
तां तां लुप् चुप् लुपचुप; तालंनादयते, शिव०
अंगुष्ठांगुलिनादं, लास्यगतं कुरुते. हर हर० ॥ ५ ॥
कर्पुरद्युतिगौरं, पंचाननसहितं, शिव०
त्रिनयनशशिधरमौलिं, विषधरकंठयुतं; शिव०
सुंदरजटाकलापं, पावकभरभालं, शिव०
डमरुत्रिशुलकपालं, खर्परधृतसारम्. हर० ॥ ६ ॥
शंखनिनादंकृत्वा, झल्लरीनादयते, शिव०

नितरांयजतेब्रह्मा, वेदचतुष्टयज्ञः; शिव०
अमृतचरणसरोजं, हृदिकमलेधृत्वा, शिव०
अवलोकयतिमहेशं, शंभुबहुनत्वा. हर० ॥ ७ ॥
मुंडैरचयतिमाला, पन्नगमुपवीतं, शिव०
वामविभागेगिरिजा—रूपंस्वतिललितं; शिव०
सकलशरीरेविलसति, कृतभस्माभरणं, शिव०
इतिब्रह्मध्वजरूपं तापत्रयहरणम्. हर० ॥ ८ ॥
ध्यानंचारानिसमये हृदयेयादिधृत्वा, शिव०
शिरसात्रिजटानाथं, ईशंबहुनत्वा, शिव०
शंबरनाशंप्रतिदिन पठनंयःकुरुते, शिव०
शिवसायुज्यंगच्छति, भक्त्यायःशृणुते. हर० महादेव॥९॥

संपूर्णम्.

॥શ્રી॥

ટીકા

પ્રાતઃસંધ્યા.

સવારમાં બ્રાહ્મ મુહૂર્તે ઉઠી શ્રી ઇષ્ટનુ સ્મરણ કરી શૌચ, દંતધાવન, સ્નાનાદિ ક્રિયાઓથી પરવારી સ્વચ્છ વસ્ત્ર પહેરી ડાબા હાથમાં ત્રણ અને જમણા હાથમાં બે દર્ભ રાખી સંધ્યા કરવા જોઇતાં પાત્રો તથા પદાર્થો પાસે લેઇ બેસવું.

૧ ત્રણ આચમન કરીને આપેલા મંત્રથી એક પ્રાણાયામ કરવો. આચમન કરીને અંગુઠાનું મૂળ મુખ ઉપર બે વખત ફેરવવું, પગપર પાણી છાંટવું, ફરી જળ લઇ માથા ઉપર છાંટવું. પછી દરેક ઇંદ્રિઓને નીચે પ્રમાણે પાણીથી સ્પર્શ કરવો. તર્જની (પહેલી આંગળી) મધ્યમા (વચલી) અનામિકા તેની જોડની) એ ત્રણથી મુખને સ્પર્શ કરવો, અંગુઠા અને તર્જનીથી નાકને, અંગુઠા અને અનામિકાથી આંખને અને કાનને, કનિષ્ઠા (ટચલી) અને અંગુઠાથી નાભિને, હથેળી વડે છાતીને, સઘળી આંગળીઓ વડે માથાને અને સઘળીના અગ્રવડે ખભાને સ્પર્શ કરવો. એ પ્રમાણે કરી પૃથ્વી ઉપર પાણી રેડવું. પ્રાણાયામનો વિધિ ગુરૂદ્વારા જાણવો.

૨ ગાયત્રી મંત્રથી શિખા બાંધવી.

૩ * જ્યાં આવું ચિન્હ હોય ત્યાં **विनियोगः** સુધી ભણી જઇ એક અંજલી મુકવી; તેમાં **विनियोगः** ની નીચે આપેલા મુખ્ય મંત્રના **ऋषिछंद** હોય છે. જમણા હાથથી ભસ્મ લઇ

ડાબા હાથમાં મુકી તેના ઉપર જમણો હાથ ઢાંકી ગાયત્રીમંત્ર ભણી જવો. પછી ભસ્મને પાણીથી ભીની કરી બે હાથે મર્દન કરી સૂર્ય તરફ ધરી **ॐ त्र्यंबकं यजा०** ભણતાં ભસ્મનું ત્રિપુંડ્ર કરવું. પછી શરીરના બીજા અંગો ઉપર ભસ્મ કરવી. તેજ મંત્રથી રુદ્રાક્ષ પણ ધારણ કરવી.

૪ **अत्राद्य....करिष्ये** સુધિ જે માસ તિથિ આદિ હોય તે બોલી સંકલ્પાર્થ અંજલી મુકવી.

૫ * * જળથી દેહની આસપાસ પ્રોક્ષણ કરી રક્ષા કરવી. પછી ડાબા હાથમાં જળ લઇને તે ઉપર જમણો હાથ ઢાંકી ગાયત્રીમંત્ર ભણી જઈ ત્રણ દર્ભની સેર વડે **ॐ आपो हिष्ठा०** થી માર્જન કરવું.

૬ બે હાથ જોડીને **पूर्वासंध्या०** ભણીને ગાયત્રીનું આવાહન તથા ધ્યાન કરવું.

૭ * ત્રણ પ્રાણાયામ કરવા.

૫ * જમણા હાથમાં જળ લઇને **ॐ सूर्यश्चमा०** ભણી જઇ આચમન કરવું. પછી બીજી બે અંજલી વગર બોલે લેવી.

૯ * જમણી હથેળીમાં જળ રાખી તે હથેળી જમણી નાસિકા આગળ રાખી **ॐऋतंच सत्यंचा.** મંત્ર એકવાર ભણાય ત્યાં સુધી તેજ નાસિકાદ્વારા શ્વાસ બહાર કાઢવો; પછી તે જળ ડાબે પડખે જોયા વગર ફેંકવું. જો એક શ્વાસે મંત્ર ના ભણી રહેવાય તો એમને એમ ત્રણવાર મંત્ર ભણવો.

૧૦ * અર્ધ્ય પાત્રમાં જળ ભરી, તે પાત્ર ખોબામાં લઇ ઉભા થઇ ગાયત્રી મંત્ર ભણી સૂર્યને ત્રણ અર્ધ્ય આપવા. પછી આચમન લઇ પ્રદક્ષિણા કરી બેસી જવું. અર્ધ્યપાત્ર ન હોય તો ખોબાથી અર્ધ્ય આપવાનો પણ વિધિ છે.

૧૧ * શ્રી સૂર્યનારાયણ સામા ઉભા રહી ડાબા ઉપર જમણો એમ બે હાથ સવળા સાથીયા માફક રાખી ॐ उदुत्यं जातवेद० થી સૂર્યોપસ્થાન કરવું.

૧૨ માસ તિથિ આદિ બોલી ગાયત્રી જાપનો સંકલ્પ કરવો અને જાપ કરી રહ્યા પછી **अनेन** ભણી અંજલી મુકવી.

૧૩ उत्तरे शिखरे० ભણી જઇ ગાયત્રી દેવીનું વિસર્જન કરવું. પછી શ્રીગુરૂ દેવ બ્રાહ્મણાદિને નમસ્કાર કરવા.

तर्पण.

આચમન અને પ્રાણાયામ કરી—

૧. માસ તિથિ આદિ બોલી સંકલ્પ કરવો.

૨. તર્પણ કરવાના પદાર્થો તૈયાર રાખી **ॐ नमो०**—ભણી જવું.

૩. કુશ પવિત્રી અનામિકાએ પહેરીને પૂર્વાભિમુખે બેસી જમણો પગ વાળી પૂર્વ દિશામાં અગ્રવાળા ત્રણ દર્ભ જમણા હાથમાં રાખી દેવતીર્થે * આંગળીના અગ્રો વડે ધોળા તલ સહિત

* દેવ તીર્થે—હાથના અગ્રભાગથી.

(કેવળ જળથી) બે હાથે દેવ તર્પણ કરવું, ને દરેક પદ બોલી એ-ક એક અંજલી આપવી.

૪ પછી જનોઇ અપસવ્ય કરી, ડાબો પગવાળી, દર્ભને બે-વડો કરી, કાળા તલ લઇને પિતૃતીર્થે* તર્પણ કરવું. અને દરેક પદ ત્રણ ત્રણવાર બોલી ત્રણ ત્રણ અંજલી આપવી.

૫ જેને માટે આપણે અંજલી આપતા હોઇએ તેનું ગોત્ર તથા નામ બોલી નીચે પ્રમાણે અંજલી આપવી. પિતા, પિતા-મહ, પ્રપિતામહ, માતા, પિતામહી, પ્રપિતામહી, માતામહ, પ્ર-માતામહ, વૃદ્ધપ્રમાતામહ, આ સર્વેને ત્રણ ત્રણ અંજલી આપવી.
માતામહી આદિ બીજાં સર્વેને એક એક અંજલી આપવી.

પછી જનોઇ સવ્ય કરીને આચમન લેવું. ત્યારબાદ.

૬ જનોઇ કંઠ કરી કાળા ધોળા તલ ભેગા લઇ, વાળેલો પ-ગ છોડી દઇ, મનુષ્યતિર્થે દરેક પદ બે બે વાર બોલી બે બે અં-જલી આપવી.

૭ જલની બહાર જનોઇ સવ્ય કરીને એક અંજલી આપવી.

૮ તલ અને કુશ સહિત વસ્ત્રમાં પાણી લઈ નીચોવવું.

---

* પિતૃતીર્થ—તર્જની તથા અંગુઠાના મધ્યભાગથી. મનુષ્ય તીર્થ—કંઠસખીત કરી છતાં હાથના અગ્રથી.

બ્રહ્મયજ્ઞ.

૧ સંકલ્પ કરવો.

૨ આમંત્રો મધ્યમ સ્વરે બોલી જવા.

૩ અંજલી મૂકવી,

મધ્યાહ્ન સંધ્યા.

આપેલો ફેરફાર જોઇ પ્રાતઃની બરોબર કરવી.

૪ અર્ધ્ય એક આપવો. ૫ ઉપસ્થાન સૂર્ય તરફ બે હાથ ઉંચા કરી કરવું.

દેવપૂજા.

આચમન અને પ્રાણાયામ કરીને.

૧ શ્રી ગણેશનું સ્મરણ કરવું

૨ * દશદિશાઓ અક્ષતથી अपेरा० ભણતાં રક્ષાર્થે બાંધી દેવી.

૩ ॐ भूमिः० ભણતાં ભૂમિને શુદ્ધ કરવી

૪ *કલશને વિશે यदाकदा० થી વરૂણનું આવાહન કરવું.

૫ य : ध्य०થી વરૂણનું પુજન કરવું.

૬ ॐ भूर्भुवः स्वः તથા ॐ मांपाहु०થી પવિત્ર કરણ

૭ માસ તિથિ આદિ બોલી પૂજાનો સંકલ્પ કરવો.

૮ ॐ आवोराजा० ॐ उदुत्य० ॐ इमारू० ॐ

रुद्रा० એ મંત્રોથી શ્રીરૂદ્ર, સૂર્ય, ગણપતિ, શક્તિ અને વિષ્ણુનું અનુક્રમે ષોડષોપચાર પૂજન કરવું.

૯ આ રૂદ્રની ગાયત્રીથી દેહને તથા દેવને ન્યાસ કરવા.

૧૦ *ॐ आवोराजा० ના મંત્રથી પાદ્ય, અર્ધ્ય, આચમન આપ્યા પછી પંચામૃતથી દેવનું પૂજન કરવું. દરેક મંત્રના ઋષિ છંદ બોલી ॐ चक्रं થી દુધ, ॐ ओहायि થી દહી થી ॐ घृताव० થી ઘી ॐ सपूर्व्योम०થી મધ અને ॐ रसन्ते થી શર્કરા સ્નાન કરાવવું દુધ આદિ પ્રત્યેક પદાર્થો महारुद्राय सांगायसपरिवाराय (અથવા જે હોય તે) स्नानंसमर्पयामि બોલીને ચઢાવવા, અને પ્રત્યેક પદાર્થ પછી જળગંધાદિક ચઢાવવાં.

૧૧ * ॐ हाउ । ३ । ભણી જળથી સ્નાન કરાવવું.

૧૨ ॐ आवो राजा० થી અભિષેક કરવો ને એજ મંત્રથી વસ્ત્ર તથા ઉપવિત ધરાવવાં.

૧૩ ॐ अर्चत० થી ચંદન, ॐ अक्षन्न० થી અક્ષત ॐ पवित्रं ते० થી પુષ્પ તથા બિલી, ॐ त्वेशास्ते० ધૂપ, ॐ हाउ । ३ ।आयुः થી દીપ, ॐ हाउ । ३ । अहममन्न० થી નૈવેદ્ય, ॐ हाउ । ३ । फाल्फ० થી ફળ, ॐ

चंद्रमा० થી દક્ષિણ **ॐ उद्यंलोका०** થી આરતિ **ॐ यज्ञेन०** થી મંત્ર પૂષ્પાંજલી કરવાં. પ્રત્યેક મંત્ર બોલતા પહેલાં * આ ચિન્હ આપ્યું હોય તે પ્રમાણે તે મંત્રના ઋષિ છંદ બોલી જળ મુકવું.

अन्नाद्य०थीं महारुद्र प्रियतां સુધી ભણી સંકલ્પ મુકવો.

વૈશ્વ દેવ.

દક્ષિણ બાજુએ શુદ્ધોદક પાત્ર, ઉત્તરમાં જળ ભરીને પ્રક્ષિતાનું પાત્ર તથા ઘીવાળુ હવિષ્યાન્ન, અને અગ્નિ તથા આપણી વચ્ચે બે સમિધ રાખવાં.

૧ આચમન અને પ્રાણયામ કરી પાક તથા વૈશ્વ દેવના પદાર્થોને ગાયત્રી મંત્રથી પ્રોક્ષણ કરવું, પછી કુંડને વિષે પંચ ભૂસંસ્કાર કરવા. (૧) દર્ભની ત્રણ સેરોથી પશ્ચિમથી પૂર્વ તરફ કુંડ ઉપરથી રજ ત્રણવાર વાળી નાખવી (૨) ગાયના છાણથી કુંડની અંદર ત્રણવાર હાથ ફેરવવો. (૩) કુશના મૂળવડે એક પશ્ચિમથી પૂર્વમાં બીજી દક્ષિણથી ઉત્તરમાં અને ત્રીજી ચોથી તથા પાંચમી પશ્ચિમથી પૂર્વમાં, એ પ્રમાણે કુંડમાં પાંચ રેખાઓ કરવી. (૪) ઉપરની પ્રત્યેક રેખામાંથી અનામિકા તથા અંગુઠા વડે રજ કાઢી નૈરૂત્યમાં નાખવી (૫) કુંડ ઉપર પાણી છાંટવું.

૨ **ॐ भूर्भुवःस्वः** બોલી પોતાની સામે લઇને કુંડમાં અગ્નિનું સ્થાપન કરી ગંધાદિથી પૂજન કરવું.

૩ માસ તિથિ આદિ બોલી સંકલ્પ કરવો.

૪ * જમણું ઢીચણ વાળી ડાબો હાથ સવળો રાખી તે-ના આંગળાં કુંડના નૈઋત્ય ખુણે અને ડાબા હાથ ઉપર જમણો હાથ ઉંધો રાખી તેનાં આંગળાં કુંડના વાયવ્ય ખુણે અડાડી ॐ इदं भूमेर्भ० મંત્ર ભણી જવો.

૫ * (૧) (૨) (૩) થી અગ્નિની દક્ષિણમાં નૈઋત્યથી અગ્નિ તરફ, પશ્ચિમમાં નૈઋત્યથી વાયવ્ય તરફ, ઉત્તરમાં વાયવ્યથી ઇશાન તરફ પ્રણિતા પાત્રમાંથી જળ લઇ અનુક્રમે ધારાઓ કરવી. પાત્રમાંનું જળ ઢોળી દઇ પછી તે પાત્રને ફરીથી ભરવું.

૬ * ॐ देव सविता ભણતાં અગ્નિ તથા પદાર્થોની ચારે તરફ પ્રણિતા પાત્રમાંથી જળધારા કરવી.

૭ એક સમિધ હોમીને ઘીવાળા હવિષ્યાન્નની બતાવ્યા પ્રમાણે સત્તર આહુતિઓ આપી ફેર એક સમિધ હોમવું.

૮ * देव सवितः ભણી પ્રણિતા પાત્રમાં ફરીથી ભરેલું જળ લઈ અગ્નિની ચારે તરફ ધારા કરવી. પછી (૧) (૨) (૩) દક્ષિણ પશ્ચિમ અને ઉત્તરમાં ઉપર બતાવ્યા પ્રમાણે ધારાઓ કરવી

૯ આપણી અને અગ્નિની વચ્ચે પશ્ચિમથી પૂર્વમાં એક એકની ઉત્તરે ચાર ધારાઓ કરવી, પછી પ્રથમ ત્રણ ધારાઓ ઉપર ચાર ચાર અને ચોથી ઉપર એક એ પ્રમાણે અંદર બતાવ્યા પ્રમાણે બોલી બળીદાન મુકવાં. પ્રત્યેક ધારાપર મુકવાનાં બળીદાનનો ભાત એક વખતે હાથમાં લેવો. પ્રત્યેક ધારાનાં બળીદાન પુરાં થાય એટલે તે ઉપર જળની ધારા કરવી. ચારે ધારાનાં બળીદાન આપ્યા પછી કાને પાણી અડાડવું.

(अ) જનોઇ અપસવ્ય કરીને ઉપલી ધારાઓની દક્ષિણે થોડું જળ મુકી પોતાના ગોત્રનું નામ લઇ પિતૃતિર્થે પિતરોનું બળીદાન મુકવું, ને તેપર જળધારા કરી કાને પાણી અડાડવું.

(ब) સવ્ય કરી, કંકકરી પશ્ચિમમાં થોડું જળ મુકી મનુષ્ય નિર્થ મનુષ્યને બળીદાન આપી તે પર ધારા કરી કાને પાણી અડાડવું.

(क) સવ્ય કરીને પૂર્વ તરફ જળ મુકી ગાયોને બળીદાન આપી ધારા કરી પાણી અડાડવું.

૧૦ आरोग्यं થી हिणा સુધી ભણી અગ્નિને નમસ્કાર કરવા. * પછી ॐ कृ०या० આદિ ત્રણ સામ ભણી જવા. પછી ॐ स्वाति: તથા चतुर्भिश्च ભણી જઇ અગ્નિને નમસ્કાર કરવા.

૧૧ (अ) [ब) (क) (ड) બોલીને ગાય, કીડી, કાગડા અને શ્વાનના અનુક્રમે વધેલા હવિષ્યાન્નમાંથી ભાગ કાઢવા. કીડી અને કાગડાના ભાગ ઘર બહાર નીકળીને નાખવા. પછી હાથ પગ ધોઇ આચમન કરવું.

ભોજનવિધિ.

ગોમયથી * ચોખુણુ મંડળ કરી તેપર અન્નપાત્ર મુકી અન્ન દેવતાનું ધ્યાન કરવું.

૧ ગાયત્રી મંત્રથી પાણી મંત્રી ॐ सत्यं० બોલી અન્નને પાણીથી પ્રોક્ષણ કરવું.

---

* બ્રાહ્મણે ચોખુણુ ક્ષત્રીએ ત્રીકોણુ અને વૈસ્યે ગોળમંડળ કરવું.

(રાત્રી એ ॐ ऋतंत्वासत्येनपरिसिंचामि० બોલવું)

૨ પાત્રની જમણી બાજુએ ભૂમિ ઉપર ધારા કરી ધીવાળા ભાતનાં પ્રત્યેક પદ બોલતાં ત્રણ બળી મૂકવાં.

૩ હાથમાં જળ લઇ ॐ अमृतो બોલી પીજવું.

૪ (૧) બોલી તર્જનિ, મધ્યમા અને અંગુઠાથી, (૨) બોલી કનિષ્ઠા, અનામિકા અને અંગુઠાવતી (૩) બોલી મધ્યમા, અનામિકા અને અંગુઠાવતી, (૪) બોલી પાંચે આંગળીઓ વતી અને (૫) બોલી તર્જનિ સિવાય બધીથી ધીવાળા ભાતના કોળીઆ મૌન રહી દાંતને અડકાડયા વિના ગળી જવા. પછી આંખે તથા કાને જળ અડાડી શિખા છોડી જમવું. જમતા અન્નને સારૂ ખોટું કહેવું નહીં.

૫ જમી રહ્યા પછી ઉચ્છીષ્ઠ અન્ન થોડું હાથમાં લઈ रौरवे० ભણી જઇ પિતૃતીર્થે હાથ વાંકો કરી ભોંયપર મુકવું. પછી તેજ પ્રમાણે તે ઉપર પાણી મુકવું.

૬ હાથમાં જળ લઇને ॐ अमृतोपि બોલી અર્ધું પીવું અને ઉપર જણાવ્યા પ્રમાણે બાકીનું અર્ધું ઉચ્છીષ્ઠ મુકેલા અન્ન ઉપર પિતૃતીર્થે મુકવું. પછી બાર કોગળા કરી મોં ધોઇ બે આચમન લેવાં અને મુખ સાફ કરવા કંઇ મુખવાસ લેવો. હાથ ભાણામાં ધોવા નહીં.

સાયંસંધ્યા.

આપેલો ફેરફાર કરી પ્રાતઃસંધ્યાની બરાબર કરવી.

ઉત્તર અથવા પશ્ચિમાભિ મુખે બેસવું. ૪ ઉપસ્થાન બે હાથ જોડી બેઠા બેઠા કરવું.

સમાપ્ત.

શુદ્ધિપત્રક.

પૃષ્ટાંક.	પંક્તિ.	અશુદ્ધિ.	શુદ્ધિ.
१	१५	संकल्य:	संकल्प:
२	१६	ब्रह्मदैवमा	ब्रह्मदैवता
३	१८	सत्य	सत्यं
६	८	तर्ययामि	तर्पयामि
१४	१६	२१ पाँः । २२	२१ ।पाँ२२ः।
२२	२	नमम०	नमम
२४	१२	चिद्रां	चिर्दां
२५	१५	प्रतिपूर्णंतु	प्रतिपूर्णांतु
३१	१८	समांचा	समांचा०